१२ पक्षलक्षणमाह संदिग्धेति ननु श्रवणानंतरभाविमननस्थलेऽव्याप्तिः तत्र वेदवाक्यैरात्मनो निश्चितत्वेन संदेहाभावा
त् किंच प्रत्यक्षेपि वह्नौ पक्षेच्छया नुमितिस्तत्राव्याप्तिरिति चेन्न उक्तपक्षताश्रयत्वस्य पक्षलक्षणत्वात् सपक्षलक्षणमाह
निश्चितेति विपक्षलक्षणमाह निश्चितेति एवं सद्धेतुं प्रसाध्यासद्धेतुं निरूपयितुं विभजते सव्यभिचारेति अनुमितितत्क

12 संदिग्धसाध्यवान्पक्षः यथा धूमवत्वे हेतौ पर्वतः निश्चितसाध्यवान्सपक्षः यथा तत्रैव महानसः निश्चितसाध्या
अन्वतिरेकदृष्टांते–२ भाववान्विपक्षः यथा तत्रैव महाह्रदः सव्यभिचारविरुद्धसत्प्रतिपक्षासिद्धबाधिताः पंचहेत्वाभासाः सव्य
भिचारोनैकांतिकः सत्रिविधः साधारणानुपसंहारिभेदात् तत्र साध्याभाववद्वृत्तिः साधारणोनैकांतिकः
साधारणा–२ यथा पर्वतोग्निमान्प्रमेयत्वादिति प्रमेयत्वस्य वह्न्यभाववति ह्रदे विद्यमानत्वात् सर्वसपक्षविपक्षव्यावृत्तः
मा३५ पक्षवृत्तिरसाधारणः यथा शब्दो नित्यः शब्दत्वादिति शब्दत्वं सर्वेभ्यो नित्येभ्योऽनित्येभ्यो व्यावृत्तं शब्दमात्र
वृत्तिः अन्वयव्यतिरेकदृष्टांतरहितोनुपसंहारी यथा सर्वमनित्यं प्रमेयत्वादिति अत्र सर्वस्यापि पक्षत्वाद्
दृष्टांतो नास्ति साध्याभावव्याप्तो हेतुर्विरुद्धः यथा शब्दो नित्यः कृतकत्वादिति कृतकत्वं हि नित्यत्वाभावेना
त्वेन व्याप्तं यस्य साध्याभावसाधकं हेत्वंतरं विद्यते स सत्प्रतिपक्षः यथा शब्दो नित्यः श्रावणत्वात् शब्दत्ववद्

दृष्टांते–१

रणान्यतरप्रतिबंधकयथार्थज्ञानविषयत्वं हेत्वाभासत्वं सव्यभिचारं विभजते सत्रिविध इति साधारणं लक्षयति त राम
त्रेति उदाहरति यथेति असाधारणं लक्षयति सर्वेति अनुपसंहारिणो लक्षणमाह अन्वयेति विरुद्धं लक्षयति सा १२
ध्येति सत्प्रतिपक्षं लक्षयति यस्येति असिद्धं विभजते असिद्ध इति ॥ ॥ ॥ ॥ ॥ ॥

...नुतच्छेद्यादेतुप दर्शनेरजुमातं गातस्थैवामीतुरंगमाह इतिवृत्तास्पर्य वशात् तच्छेदेन साध्यग्रहस्तथा च साध्याभाववदृत्त्वभावयोर्व्याप्तिर्व्यतिरेकव्या...
...मत्रास्याद्युपस्थितस्य परित्यागे मानाभावादिति चेन्न लिङ्गपरामर्शोतिलिङ्गम् रिति भावः ॥

अनुमानमुपसंहरति तस्मादिति लिङ्गं विभजते लिङ्गमिति अन्वयव्यतिरेकिणं लक्षयति अन्वयेनेति हेतुसाध्ययोर्व्याप्ति
रन्वयव्याप्तिः तदभावयोर्व्याप्तिः व्यतिरेकव्याप्तिः केवलान्वयिनो लक्षणमाह अन्वयेति केवलान्वयिसाध्यकं केवला
न्वयि अत्यन्ताभावाप्रतियोगित्वं केवलान्वयित्वं केवलान्वयिनमुदाहरति घटोभिधेयः प्रमेयत्वादिति ईश्वरप्रमावि
षयत्वं सर्वपदा[illegible]भिधेयत्वं च सर्वत्रास्तीति व्यतिरेकाभावः व्यतिरेकमुदाहरति पृथिवीति ननु इतरभेदः प्रसिद्धो न वा

तस्माल्लिङ्गपरामर्शोनुमानं लिङ्गं त्रिविधं अन्वयव्यतिरेकि केवलान्वयि केवलव्यतिरेकि चेति अन्वयेनव्य
तिरेकेण व्याप्तिमदन्वयव्यतिरेकि यथा वह्नौ साध्ये धूमवत्त्वं यत्र धूमस्तत्राग्निर्यथा महानस इत्यन्व ॥
यव्याप्तिः यत्र वह्निर्नास्ति तत्र धूमोपि नास्ति यथा महाहृद इति व्यतिरेकव्याप्तिः अन्वयमात्रव्याप्तिकं केवलान्वयि य
था घटोभिधेयः प्रमेयत्वात्पटवदिति अत्र प्रमेयत्वाभिधेयत्वयोर्व्यतिरेकव्याप्तिर्नास्ति सर्वस्य प्रमेयत्वादभिधे ॥
यत्वाच्च व्यतिरेकमात्रव्याप्तिकं केवलव्यतिरेकि यथा पृथिवी इतरेभ्यो भिद्यते गन्धवत्त्वात् यदितरेभ्यो न भि
न द्यते न तद्गन्धवत् यथा जलं न चेदं तथा तस्मान्न तथेति अत्र यद्गन्धवत्तदितरेभ्यो भिन्नमित्यन्वयदृष्टान्तो नास्ति पृथि ॥

व्याश्चेयत्र प्रसिद्धस्तत्र हेतुत्वेऽन्वयित्वं असत्त्वे साधारण्यं द्वितीये साध्यज्ञानाभावात् कथं तद्विशिष्टानुमितिः विशे
षणज्ञानाभावे विशिष्टज्ञानानुदयात् प्रतियोगिज्ञानाभावात् व्यतिरेकव्याप्तिज्ञानमपि न स्यादिति चेन्न जलादित्र
योदशान्योन्याभावानां त्रयोदशानां प्रत्येकं प्रसिद्धानां मेलनं पृथिव्यामेव साध्यते तत्र त्रयोदशत्वावच्छिन्नसाध्यस्य
एकाधिकरणवृत्तित्वाभावान्नान्वयित्वासाधारण्ये प्रत्येकाधिकरणप्रसिद्ध्या साध्यविशिष्टानुमितिः व्यतिरेकव्याप्ति

केवलव्यतिरेकिणो लक्षणमाह व्यतिरेकमात्रेति साध्याभावसाधनाभावयोर्व्याप्तिः [illegible] व्यतिरेकिव्याप्ति

२०७

क॰ ८

इतरेषां तु परामर्शे प्रतिबंधकत्वं तन्न साध्यसाधारणस्य व्यभिचाराभावत्वस्य विरुद्धस्य समानाधिकरणाभावतया
५ व्याप्यत्वासिद्धस्य विशिष्टव्याप्त्यभावतया साधारण्यान्यतमे हेत्वाभासे व्यभिचारस्वरूपघटकत्वेन व्यभिचारज्ञानप्र
तिबंधकत्वं व्याप्यत्वासिद्धिस्वरूपासिद्ध्योः पक्षधर्मताज्ञानप्रतिबंधकत्वं उपाधेस्तु व्यभिचारज्ञानद्वारा व्याप्तिज्ञान
क॰ ४ प्रतिबंधकत्वमिति साध्यसाधनं तु पक्षताविरहत्वरूपासिद्धेनैव निगृहीतमिति प्राचः निग्रहस्थानान्तरमिति नवीनाः उपमान
लक्षयति उपमितिरिति इत्युपमाने शब्दं लक्षयति आप्तेति पदलक्षणमाह शक्तमिति अर्थस्मरणानुकू

उपमितिकरणमुपमानं संज्ञासंज्ञिसंबंधज्ञानमुपमितिः तत्करणं सादृश्यज्ञानं तथाहि कश्चिद्गव
यशब्दार्थमजानन् कुतश्चिदारण्यकपुरुषाद्गोसदृशो गवय इति श्रुत्वा वनं गतो वाक्यार्थं स्मरन् गोसदृ
१।६ शं पिंडं पश्यति तदनंतरमसौ गवयशब्दवाच्य इत्युपमितिरुत्पद्यते वाक्यार्थमुपमानम् आप्तवाक्यं श
ब्दः आप्तस्तु यथार्थवक्ता वाक्यं पदसमूहः यथा गामानयेति शक्तं पदम् अस्मात्पदादयमर्थो बोद्ध
13 व्य इति ईश्वरसंकेतः शक्तिः

लः पदपदार्थसंबंधः शक्तिः सा च पदार्थान्तरमिति मीमांसकाः तन्निरासार्थमाह अस्मादिति डित्था
दीनामिव घटादीनामपि संकेत एव शक्तिः ननु पदार्थान्तरमित्यर्थः गवादिशब्दानां जातावेव शक्तिः वि
शेषणतया जातेः प्रथममुपस्थितत्वात् व्यक्तिलाभस्त्वाक्षेपादिति केचित् तन्न गामानयेत्यादौ वृद्ध ५
व्यवहारे सर्वाङ्गनयनादेर्व्यक्तावेव संभवेन जातिविशिष्टव्यक्तावेव शक्तिः ॥

मीमांसकाः=

आश्रयासिद्धमुदाहरति गगनेति स्वरूपासिद्धमुदाहरति शब्द इति व्याप्यत्वासिद्धस्य लक्षणमाह सोपाधि
क इति उपाधिलक्षणमाह साध्येति उपाधिश्चतुर्विधः केवलसाध्यव्यापकः पक्षधर्मावच्छिन्नसाध्यव्या
पकः साधनावच्छिन्नसाध्यव्यापकः उदासीनधर्मावच्छिन्नसाध्यव्यापकश्चेति आद्यः आर्द्रेन्धनसंयोगः द्विती
यो यथा वायुः प्रत्यक्षः प्रमेयत्वादित्यत्र बहिर्द्रव्यत्वावच्छिन्नप्रत्यक्षत्वव्यापकमुद्भूतरूपवत्त्वं तृतीयो यथा ध्वंसो

आश्रयासिद्धः स्वरूपासिद्धो व्याप्यत्वासिद्धश्चेति आश्रयासिद्धो यथा गगनारविन्दं सुरभि अरविन्दत्वात् सरो
जारविन्दवदिति अत्र गगनारविन्दमाश्रयः स च नास्त्येव स्वरूपासिद्धो यथा शब्दो गुणः चाक्षुषत्वादिति
अत्र चाक्षुषत्वं हेतुः स च शब्दे नास्त्येव शब्दस्य श्रावणत्वात् सोपाधिको व्याप्यत्वासिद्धः साध्यव्यापकत्वे
सति साधनाव्यापकत्वमुपाधिः साध्यसमानाधिकरणात्यन्ताभावाप्रतियोगित्वं साध्यव्यापकत्वं सा
धनवन्निष्ठात्यन्ताभावप्रतियोगित्वं साधनाव्यापकत्वं पर्वतो धूमवान् वह्निमत्त्वादित्यत्र आर्द्रेन्धनसंयोग उ
पाधिः यत्र धूमस्तत्र आर्द्रेन्धनसंयोग इति साध्यव्यापकत्वं यत्र वह्निस्तत्रार्द्रेन्धनसंयोग इति नास्ति अयो
गोलके आर्द्रेन्धनाभावात् एवं साध्यव्यापकत्वे सति साधनाव्यापकत्वादार्द्रेन्धनसंयोग उपाधिः सोपाधिक
त्वाद्वह्निमत्त्वं व्याप्यत्वासिद्धं यस्य साध्याभावः प्रमाणान्तरेण निश्चितः स बाधितः वह्निरनुष्णः द्रव्यत्वादिति अत्रा

भावो विनाशी जन्यत्वादित्यत्र जन्यत्वावच्छिन्नानित्यत्वव्यापकं भावत्वं चतुर्थो यथा प्रागभावो विनाशी प्रमेयत्वादित्यत्र जन्य
त्वावच्छिन्नविनाशित्वव्यापकं भावत्वम् अत्र बाधितस्य ग्राह्याभावनिश्चयेन सत्प्रतिपक्षस्य विरोधिज्ञानसामग्रीत्वं

शाब्दप्रसंगात्तच्छक्तिभेदमाह=२ ननु घटपदस्यार्थो घटः द्वितीयायाः कर्मत्वं वाक्यार्थसमये निष्ठत्वादी ... नोकस्माद्बोध इत्यत आकुरितरा न्वितेति=३

२८ पदविशेषजन्यपदार्थोपस्थितेः शाब्दज्ञानहेतुत्वाद्यथा घटः कर्मत्वमानयनं कृतिरित्यत्रापि शाब्दज्ञान
प्रसंगात् पंकजादिपदेषु योगरूढिः अवयवशक्तिर्योगः समुदायशक्ती रूढिः नियतपद्मज्ञानार्थं स
मुदायशक्तिः अन्यथा कुमुदादिप्रयोगप्रसंगः इतरान्विते शक्तिरिति प्राभाकराः अन्वयस्य वाक्यार्थत ननु तन्निरस्यते गौ नमो पि रन्वयस्यत्या
याभानसंभवात् अन्वयांशे शक्तिर्न कल्पनीयेति गौतमीयाः आकाङ्क्षेति आकाङ्क्षादिज्ञानमित्यर्थः पिना=३
आकाङ्क्षादिसत्त्वेपि तज्ज्ञानाभावे शाब्दबोधानुदयोत्

74 आकाङ्क्षा योग्यता सन्निधिश्च वाक्यार्थज्ञानहेतुः पदस्य पदान्तरव्यतिरेकप्रयुक्तान्वयाननुभाव
कत्वमाकाङ्क्षा अर्थाबाधो योग्यता पदानामविलम्बेनोच्चारणं सन्निधिः आकाङ्क्षादिरहितं वाक्यमप्र म२ दि२
माणं यथा गौरश्वः पुरुषो हस्तीति न प्रमाणम् आकाङ्क्षाविरहात् अग्निना सिञ्चेदिति न प्रमाणं योग्य
ताविरहात् प्रहरे प्रहरे सहोच्चारितानि गामानयेत्यादिपदानि न प्रमाणं सान्निध्याभावात् वाक्य
शिहिवि

आकाङ्क्षाद्याहेतुत्वे अन्यथा आकाङ्क्षाविभ्रमात् शाब्दधीभ्रमो न स्यात् आकाङ्क्षां लक्षयति पदस्येति योग्यतालक्षणमा
ह अर्थेति सन्निधिलक्षणमाह पदानामिति अविलम्बेन पदार्थोपस्थितिः सन्निधिः उच्चारणं तु
तदुपयोगितया उक्तं गौरश्व इति वदः कर्मत्वमिमवर्थेनाकाङ्क्षोदाहरणं द्रष्टव्यं वैदिकस्य वेलक्ष २८
णमाह वैदिकमीश्वरोक्तत्वादिति ॥ ॥ ॥ ॥

आकाङ्क्षाया लक्षणे=४

स्यःनान शक्तिग्रहः स्वकृदृत्वव्यवहारेणानयादिम्बिपित्स्वर्गलोकमानयेत्युत्तमवृद्धवाक्यश्रवणानंतरं मध्यमवृद्धस्य
प्रवृत्तिमुपलभ्य बालः घटानयनं च दृष्ट्वा मध्यमवृद्धप्रवृत्तिजनकज्ञानस्य अन्वयव्यतिरेकाभ्यां वाक्यजन्यत्वं निश्चि
त्य अश्वमानय गां बधानेति वाक्यांतरे आवापोद्वापाभ्यां गोपदस्य गोत्वविशिष्टे शक्तिः अश्वपदस्य अश्वत्व
विशिष्ट इति गृह्णाति ननु सर्वत्र कार्यपरत्वाद्व्यवहारस्य कार्य एव वाक्यानां व्युत्पत्तिः न सिद्धपर इति चेन्न काशां
त्रिभुवनतिलको भूपतिरित्यादौ सिद्धेपि व्यवहारात् विकसितपद्मे मधुकरस्तिष्ठतीत्यादौ प्रसिद्धपदसमभिव्याहा
रात् सिद्धेपि मधुकरादिवृत्तितिर्दर्शनाच्च लक्षणापि शब्दवृत्तिः शक्यसंबंधो लक्षणा गंगायां घोषः अत्र
गंगापदवाच्यप्रवाहसंबंधादेव तीरोपस्थितौ तीरेपि शक्तिकल्पने संबंधादौ लक्षणायाः परस्परसंबंधा
भावान्नानाशक्तिकल्पने लक्षणापि त्रिविधा जहल्लक्षणा अजहल्लक्षणा जहदजहल्लक्षणा चेति यत्र वा
च्यस्यान्वयाभावः तत्र जहती यथा मंचाः क्रोशंतीति यत्र वाच्यस्याप्यन्वयः तत्राजहती यथा छत्रिणो
गच्छंतीति यत्र वाच्यैकदेशत्यागेन एकदेशान्वयः तत्र जहदजहती यथा तत्त्वमसीति गौणापि लक्षणैव
लक्ष्यमाणगुणसंबंधरूपा अग्निर्माणवक इति व्यंजनापि शक्तिलक्षणांतर्भूता शाब्दी शक्तिमूला अर्थ
शक्तिमूला च अनुमानादिनान्यथासिद्धा तात्पर्यानुपपत्तिर्लक्षणाबीजं तत्प्रतीतिच्छयोच्चरितत्वं
तात्पर्यं तात्पर्यज्ञानं हेतुः नानार्थानुरोधात् प्रकरणादिकं तात्पर्यग्राहकं द्वारमित्यादौ पिधेहीति प्र
शब्दाध्याहारः ननु शब्दाध्याहारस्यार्थज्ञानार्थत्वात् शाब्दमर्थमविनापि शब्दाध्याहारासंभवात् अर्थाध्याहार एव युक्त इति चेन्न

...भाकरमतं दर्शय
...ननु वित्यादिना
...टः पटइत्यादीनि
...कवहोधजनकानि
...टमानयेत्यादीनि
...नैषां कार्यपरत्वा
...नाभूत् तद्व्यवहार
...कार्यपरत्वाऽभ्रम
...व्यवहारार्थत्वा
...तिभावः =४

अन्वयनिरस्यन्ति
त्यादिना =४
अनन्यलभ्यः श
ब्द इत्यायात् =

मीमांसकः शंकते ननु इत्यादिना ८

पंचाशतसंख्या ग्रातात्मकसंख्यां न गतातन्यून संख्यात्वात् विंशत्यात्मक संख्यावत् =२

पीनो देवदत्तो दिवा न भुंक्ते ॥ १ अधुना संभवेतिह्ययोः प्रमाणान्तरत्वं केषांचिदभिमतं तत्खण्डयति शतेत्यादिना =२

१२ ॰इतिदृष्टश्रुतेवा पीनत्वान्यथानुपपत्त्या रात्रिभोजनमर्थापत्त्याकल्प्यते इति चेन्न देवदत्तो रात्रौ भुङ्क्ते दिवाऽभुञ्जानत्वेस
ति पीनत्वादित्यनुमानेनैव रात्रिभोजनस्य सिद्धत्वात् एतेन चेष्टादेरपि संभवोऽप्यनुमानमेव इहपदे यत्तलिङ्गतीते
तिस्मृतिपि अज्ञातमूलवक्तृकः प्रसिद्धप्रवादेऽप्याप्तोक्तानुमानद्वाराप्रवदरारेनरितिनमानान्तरं तस्मात्प्रमत्तानाम
नोपमानशाब्दश्रवणार्थापत्तिप्रमाणानि तानानीनहृतिनस्पकारकं स्वतो ग्राह्यं परतो वेति विचार्यते तत्र विप्रतिप
त्तिः ज्ञानप्रामाण्यं तदप्रामाण्याग्राहकयावज्ज्ञानग्राहकसामग्रीग्राह्यं नवा अत्र विधिकोटिः स्वतस्त्वं निषेधकोटिः
परतस्त्वं अनुमानग्राह्यत्वेन सिद्धसाधनवारणाय यावदिति इदं ज्ञानं अप्रमेतिज्ञाने नाप्रामाण्यं गृह्यते तद्वारणाय
यावत्प्रामाण्यग्राहकेति इदं ज्ञानमप्रमेत्यनुव्यवसायनिष्ठप्रामाण्यग्राहकस्य अप्रामाण्यग्राहकत्वाभावात् स
न्वं नस्यात् अत उक्तमिति नस्मिन्प्रामाण्यग्रहे अप्रामाण्याग्राहकत्वमर्थः उदाहृतस्थले व्यवसायेऽप्रामाण्यग्रा
हकस्यापि अनुव्यवसायेतद्ग्राहकत्वात् स्वतस्त्वसिद्धि नन्वेवं तत्र प्रामाण्यग्रहे सति अहमिदं जानामीत्यनुव्यवसा
येन तद्वतः तत्प्रकारकत्वरूपस्य प्रामाण्यस्य विषयीकरणात् व्यवसायरूपप्रयासतः तस्य तत्वात् पुरोवर्तिनिःप्रका
रसंबंध सैव प्रमात्वपदार्थत्वादिति चेन्न स्वतः प्रामाण्यग्रहे जलज्ञाने प्रमात्वे अनभ्यासदशायां प्रमात्वसं
शयो न स्यात् अनुव्यवसायेन प्रामाण्यस्य निश्चितत्वात् तस्मात्स्वतो ग्राह्यत्वाभावात् परतो ग्राह्यत्वं ॥

ज्ञानप्रामाण्यग्रहे मीमांसकमतं तं दर्श यति ज्ञानप्रामाण्यमिति =५

15

अप्रामाण्यस्यानुमानद्वारा इत्यर्थः चेष्टायाश्चानुमा येन तन्त्रापि तेनैव ज्ञाप्यत्वं न्यायसिद्धत्वात् अनुमानान्तरत्व मिति भावः =

॥ धूमाभाववति भूतले धूमवद्भूतलमिति ज्ञाने जाते इदं ज्ञानं प्रमेति ज्ञानं नाऽप्रमेत्यत्र ॥ व्यवसायात्मकं इति नीतापन्ने ज्ञाने इयं दृष्टि रेव संभवे वैयाकरणमिति =२

मुरारिमिश्रः शीकतेनत्विति =४

ननु तस्मिन्वेद इदं ज्ञानं प्रमेति इत्यनुव्यवसायजन्यज्ञानं तत्र ॥

प्रभाकरमते प्रामाण्यग्राहकेति अयं स्वं प्रामाण्यग्राहकत्वेन तन्मते प्रामाण्यग्राहकत्वात् =८

मीमांसकः शंकते नन्वित्यादिना ननु तर्हि वेदः सादिः पुरुषनिर्मितो नातथात्वं यः कल्प्यः सकल्पपूर्वं इत्यादिन्यायेन संसारस्यानादित्वात्
ईश्वरस्य सर्वज्ञत्वादीश्वरो सकल्पपूर्वं वेदस्य त्वास्मिन् कल्पे उपदिशतीति ... वेदाध्ययनं गु

अनुमानेनेति चेन्न ननु वेदस्यानादित्वात् कथमीश्वरोक्त इति चेन्न वेदः पौरुषेयः वाक्यसमूहत्वात् ... भारता
दिवत् न च स्मर्यमाणकर्तृत्वमुपाधिः गौतमादिभिः शिष्यपरंपरया वेदेऽपि सकर्तृत्वस्मरणेन साधनव्या
पकत्वात् तस्मात्तेन प्रणीतो वेदः आज्ञापनेः इति श्रुतेश्च ननु वर्णा नित्याः स एवायं गकार इति प्रत्यभिज्ञाबलात्
कथं वेदस्यानित्यत्वमिति चेन्न उत्पन्नो गकारो नष्टो गकार इति प्रतीत्या वर्णानामनित्यत्वात् सोयं गका
र इति प्रत्यभिज्ञायाः सेयं दीपज्वालेतिवत् जात्यावलम्बनत्वात् वर्णानां नित्यत्वेऽपि आनुपूर्वीविशिष्टवा
क्यस्यानित्यत्वाच्च तस्मादीश्वरोक्तो वेदः मन्वादिस्मृतीनामाचाराणां च वेदमूलकतया प्रामाण्यमेवं स्मृतिमू
लं वैदिकं लौकिकं च वैदिकमीश्वरोक्तत्वात् स्वत एव प्रमाणं लौकिकं त्वाप्तोक्तं प्रमाणं वाक्यात्
ज्ञानेषु शाब्दज्ञानं तत्करणं शब्दः इति यथार्थानुभवो निरूपितः लक्षणानामिदानीमनध्ययनात् न
मूलं भूतकाचित्कालोच्छिन्नेति कल्प्यते ननु प्रत्यक्षमानवेदवाक्यानामस्य कल्पितत्वमशक्यतया विप्र
कीर्णवाक्यस्याप्रकृतत्वात् नित्यानुमेयो वेदो मूलमिति चेन्न तथापि वर्णानुपूर्वीज्ञानाभावेन बोधकता
सम्भवात् ननु तानि पदानि स्मारितार्थसंसर्गवन्ति आकांक्षादिमत्पदकदम्बकत्वात् गामानय दण्डेनेति म
द्वाक्यवदित्यनुमानादेव संसर्गज्ञानसंभवात् शाब्दं प्रमाणान्तरमिति चेन्न अनुमित्यपेक्षया शाब्दज्ञान
विलक्षणस्य शाब्दानुभवस्य ... सर्वसम्मतत्वात् ननु पर्यायानिरपि प्रमाणानां सर्वं
तेरसम्भवो ... ॥ ॥

नु तर्हि मीमांसकमतं ... इत्यादिना=४

ननु वेदस्येश्वरोक्तत्वेऽपि ... = ६

वेदाध्ययनपूर्वकं वेदाध्ययनत्वात् आधुनिकवेदाध्ययनवत् इत्याद्यनुमानाच्च वेदस्यानादित्वमपौरुषेयत्वं सिद्ध्यतीति ... इत्यादिना=१

ननु तन्मूलभूतो वेदः ... इति=६

एकदेशिमतं दूषयति=३

वेदोऽनित्य इति मते नाशं क्वचनेत्यादिना ... इत्यादिना=२

१६ विपर्ययलक्षणमाह मिथ्येति तदभाववति तत्प्रकारकनिश्चय इत्यर्थः तर्कलक्षणमाह व्याप्येति यद्यपि त
र्कोपि विपर्ययान्तर्भवति तथापि प्रमाणानुग्राहकत्वात् भेदेन कीर्तनं स्मृतिं विभजते स्मृतिरिति सुखं लक्षयति ति २
सर्वेषामिति स्वात्मवृत्तित्वावच्छेदेनावसायसाध्यत्वादिलक्षणं यथाश्रुतेन तु सहरूपकथनमिति द्रष्टव्यं संस्का
रं विभजते संस्कार इति संस्कारत्वजातिमान् संस्कारः वेगस्य लक्षणमाह वेग इति वेगत्वजातिमान् वेगः भा
मि आत्मनि विपर्ययः यथा शुक्ताविदं रजतमिति व्याप्यारोपेण व्यापकारोपस्तर्कः यथा यदि वह्निर्न स्यात्
र्हि धूमोपि न स्यादिति स्मृतिरपि द्विविधा यथार्था अयथार्था च प्रमाजन्या यथार्था अप्रमाजन्या अयथार्था सर्वेषामनु द्वि २
16 कूलवेदनीयं सुखं प्रतिकूलवेदनीयं दुःखं इच्छा कामः क्रोधो द्वेषः कृतिः प्रयत्नः विहितकर्मजन्यो ध
र्मः निषिद्धकर्मजन्यस्त्वधर्मः बुद्ध्यादयोष्टावात्ममात्रगुणाः बुद्धीच्छाप्रयत्ना नित्या अनि
६२ त्याश्च नित्यास्तस्य अनित्या जीवस्य संस्कारस्त्रिविधः वेगो भावना स्थितिस्थापक[illegible] पकश्चेति वेगः पृथि
व्यादिचतुष्टयमनोवृत्तिः अनुभवजन्या स्मृतिहेतुर्भावना आत्ममात्रवृत्तिः अन्यथाकृतस्य पुनस्तदव
वनां लक्षयति अनुभवेति आत्मादावतिव्याप्तिवारणाय भवेति अनुभवध्वंसेऽतिव्याप्तिवारणाय
स्मृतीति स्मृतेरपि संस्कारजनकत्वं नवीनैरुक्तं स्थितिस्थापकं लक्षयति अन्यथेति संख्यादयो
ष्टौ नैमित्तिकद्रवत्ववेगस्थितिस्थापकाः सामा ॥ ॥ ॥ १६

ज्यर्थ्य५

सर्वेषामेव ज्ञानानां ज्ञानग्राह्यत्वात् अप्रमात्वस्यैवाभावात् कुतः परतोग्राह्यत्वमित्याशयेनाशंकते प्रमाकरोतन्विति=७

तथाहि प्रथमजलज्ञानानंतरं प्रवृत्तौ सत्यां जललाभे सति पूर्वोत्पन्नं जलज्ञानं प्रमा समर्थप्रवृत्तिजनक
त्वात् यन्नैवं तन्नैवं यथा अप्रमेति व्यतिरेकिणा प्रमात्वं निश्चीयते द्वितीयादिज्ञानेषु पूर्वज्ञानदृष्टांतेन
तत्सजातीयत्वलिंगेन अन्वयव्यतिरेकिणा निश्चीयते प्रमाया गुणजन्यत्वमुत्पत्तौ परतस्त्वं प्रमासा
धारणकारणं गुणः अप्रमासाधारणकारणं दोषः तत्र प्रत्यक्षे विशेष्यवति विशेषणसन्निकर्षो गुणः
अनुमितौ व्यापकवति व्याप्यज्ञानं उपमितौ यथार्थसादृश्यज्ञानं शाब्दज्ञाने यथार्थयोग्यताज्ञानमित्या
द्यूहनीयं पुरोवर्तिनि प्रकाराभावस्याप्रमायां नियतत्वात् अप्रमात्वं परत एव गृह्यते पित्तादिदोष
जन्यत्वादप्रमायाः परतस्त्वं ननु सर्वज्ञानानां यथार्थत्वात् अयथार्थज्ञानमेव नास्ति न च शुक्ताविदं रजत

अयथार्थानुभवस्त्रिविधः संशयविपर्ययतर्कभेदात् एकस्मिन्धर्मिणि विरुद्धनानाधर्मवैशिष्ट्या
वगाहिज्ञानं संशयः यथा स्थाणुर्वा पुरुषो वेति

मितिज्ञानात् प्रवृत्तिदर्शनादन्यथाख्यातिसिद्धिरि
ति वाच्यं रजतस्मृतिपुरोवर्तिज्ञानाभ्यामेव प्रवृत्तिसंभवात् उपस्थिते रजतभेदाग्रहस्यैव सर्वत्र प्र
वर्तकत्वे नेदं रजतमित्यादावतिप्रसंगाभावादिति चेन्न सत्यरजतस्थले पुरोवर्तिविशेष्यकरजतत्वप्रका
रकज्ञानस्य लाघवेन प्रवृत्तिजनकत्वात् शुक्तावपि रजतार्थिप्रवृत्तिजनकत्वेन विशिष्टज्ञानस्यैव कल्प
नात् अयथार्थज्ञानं विभजते अयथार्थेति स्पष्टम् मानसज्ञानविपर्ययरूपत्वात् नैवं विरोधः संशयलक्षण
माह एकेति तदभाववति तन्निष्ठत्वं वदलेनेति आक्षिप्तवारणाय एकेति विरोधि भासमानत्वान्निश्चितवारणायवि

ननु ज्ञानसामान्यस्य यथार्थत्वेनेदं रजतमिति तदैव बाधोत्पत्त्यादिति चेदुदपदादेवैर्ज्ञानाशयेनाह नेदमिति=४

निश्चिताक्षिप्तवारणाय
दृश्निश्चितवारणायैविविद्धि

त.टी २१ त्पत्तिमनादिरिति आकाशादेर्वृत्तित्वाभिवारणाय ध्वंसांतःइति घटादावृत्तित्वाभिवारणायानादिरिति प्रतियोगिसम
वायिकारणावृत्तिः प्रतियोगिजनकः भविष्यतीति व्यवहारविषयः प्रागभावः ध्वंसलत्पत्तिमदिति घटादावृत्तित्वा
भिवारणायानंतःइति आकाशादावतिव्याप्तिवारणाय सादिरिति प्रतियोगिजन्यः प्रतियोगिसमवायिवृत्तिर्ध्वंसव्य
वहारहेतुः ध्वंसः अत्यंताभावत्वमाह त्रैकालिक इति अन्योन्याभावत्वमाह तादा[illegible]इति प्रतियोगितावच्छे तमृ४
दकमारोप्यसंसर्गावच्छिन्नभेदादेकप्रतियोगिकयोरत्यंताभावान्योन्याभावयोर्वैरूप्यं केवलत्वेऽत्यंताभावाद्
युभाव इति प्रतीत्या विशिष्टाभावः अतिरिक्तः एकसत्वे द्वौ न स्त इति प्रतीत्या द्वित्वावच्छिन्नाभावः संयोगसंब
धेन घट[illegible]वति समवायसंबंधेन घटाभावः तत्र घटाभावात् घटत्वावच्छिन्नप्रतियोगिकसामान्याभावः
अतिरिक्तः एवमन्योन्याभावोपि घटत्वावच्छिन्नपटे नास्ति इति व्यधिकरणधर्मावच्छिन्नाभावो नांगीक्रियते
पटे घटत्वेन नास्तीति तस्यार्थः अतिरिक्तत्वे सकेवलान्वयि सम[illegible]यिकाभावोऽत्यंताभाव एव सम[illegible]यविशे
व४ षेऽप्रतीयमानः घटाभाववति घटानयनेऽत्यंताभावस्यान्यगमनाभावेपि अप्रतीतेर्घटापसारणे सति प्र
तीतेः भूतले घटसंयोगप्रागभावध्वंसयोर्घटात्यंताभावप्रतीतिनियामकत्वं कल्प्यते घटवति तत्
संयोगप्रागभावध्वंसयोरसत्वात् अत्यंताभावस्याप्रतीतेर्घटापसारणे च संयोगध्वंससत्वात् केव त.स्र २१
लाधिकरणाद्येवनास्तीति व्यवहारोपपत्तौ अभावो न पदार्थांतरमिति २३ ॥ ॥ इतीतिरीतिः२

द्रव्यविभाजकोपाधिद्वयं पृथिवीत्वंजलत्वद्वयं

के४ दा२

मगुणाः अग्रे रूपादयो विशेषगुणाः द्रव्यविभाजकोपाधिद्वयसामानाधिकरण्यवृत्तिगुणवृत्तिजातिमत्त्वं विशे
षगुणत्वं कर्मणो लक्षणमाह चलनेति उत्क्षेपणादीनां कार्यभेदमाह ऊर्ध्वेति शरीरे तिवक्रतासंपादकं कर्मा
कुञ्चनम् ऋजुतासंपादकं प्रसारणमित्यर्थः सामान्यं लक्षयति नित्यमिति परमाणुपरिमाणे वर्तते अतिव्याप्तिवारणाय
नेकेति संयोगे तिव्याप्तिवारणाय नित्यमिति जलपरमाणुरूपे तिव्याप्तिवारणायैति अनुगतत्वं समवेतत्वं तेन

चलनात्मकं कर्म ऊर्ध्वदेशसंयोगहेतुरुत्क्षेपणम् अधोदेशसंयोगहेतुरपक्षेपणं शरीरसन्निकृष्टसंयोगहे
तुराकुञ्चनं विप्रकृष्टसंयोगहेतुः प्रसारणम् अन्यत्सर्वं गमनं नित्यमेकमनेकानुगतं सामान्यं द्रव्यगुण
कर्मवृत्ति परमपरं च परं सत्ता अपरं जातिर्द्रव्यत्वादि नित्यद्रव्यवृत्तयो व्यावर्तका विशेषाः नित्यसंबंधः समवायः
अयुतसिद्धवृत्तिः ययोर्द्वयोर्मध्ये एकमविनश्यदपराश्रितमेवावतिष्ठते तावयुतसिद्धौ अवयवावयविनौ
गुणगुणिनौ क्रियाक्रियावन्तौ जातिव्यक्ती विशेषनित्यद्रव्ये चेति अनादिः सान्तः प्रागभावः उत्पत्तेः पू
र्वं कार्यस्य सादिरनन्तः प्रध्वंसः उत्पत्त्यनन्तरं कार्यस्य त्रैकालिकसंसर्गावच्छिन्नप्रतियोगिकोऽत्यन्ता
भावः यथा भूतले घटो नास्तीति तादात्म्यसंबंधावच्छिन्नप्रतियोगिकोऽन्योन्याभावः घटः पटो न भवति

नाभावादावतिव्याप्तिः विशेषं लक्षयति नित्येति समवायं लक्षयति नित्यसंबंध इति संयोगे तिव्याप्तिवारणाय नित्य
इति आकाशादावतिव्याप्तिवारणाय संबंध इति अयुतसिद्धलक्षणमाह ययोरिति नीलो घट इति विशिष्टप्रतीति
विशेषणविशेष्यसंबंधविषया विशिष्टप्रत्ययत्वात् दण्डीति प्रत्ययवदिति समवायसिद्धिः अवयवावयवि

तादात्म्यसंबंधातिरिक्तेन येन येन संबंधेन येन रूपेण घटत्वेन नीलघटत्वेन वा प्रतियोगी घट आरोप्य
निषिध्यते संयोगेन समवायेन [illegible] दिना

तर्की॰
२९

त्रिप्रसंगप्रतिदृष्टान्तस्त्वनुत्पत्तिसंशयप्रकरणाहेत्वर्थापत्त्यविशेषोपपत्त्युपलब्ध्यनुपलब्धिनित्यानित्यकार्य
समा जातयः वादिनोपन्यस्ते हेतौ निग्रहस्थानं प्रतिज्ञाहानिः प्रतिज्ञान्तरं प्रतिज्ञाविरोधः प्रतिज्ञासंन्यासः हेत्वन्त
रं अर्थान्तरं निरर्थकं अविज्ञातार्थं अपार्थकं अप्राप्तकालं न्यूनं अधिकं पुनरुक्तं अननुभाषणं अज्ञानं अप्र
तिभा विक्षेपः मतानुज्ञा पर्यनुयोज्योपेक्षणं निरनुयोज्यानुयोगः अपसिद्धान्तः हेत्वाभासाश्च निग्रहस्था
नानि शेषं सुगमं ननु करतलानलसंयोगे सत्यपि प्रतिबन्धके सति दाहानुत्पत्तेः शक्तिः पदार्थान्तरमिति भ॰५
चेन्न प्रतिबन्धकाभावस्य कार्यमात्रे कारणत्वेन शक्तेरनुपयोगात् कारणत्वस्यैव शक्तिपदार्थत्वात् ननु भस्मा
दिना कांस्यपात्रादौ शुद्धिदर्शनात् आद्ये च शक्तिरङ्गीकार्येति चेन्न भस्मादिसंयोगसमानकालीनास्पृष्टस्प
र्शप्रतियोगिकयावदभावसहितभस्मादिसंयोगध्वंसस्य शुद्धिपदार्थत्वात् स्वत्वमपि न पदार्थान्तरं य
थेष्टविनियोगयोग्यत्वस्य स्वत्वरूपत्वात् तदवच्छेदकं च प्रतिग्रहादिलब्धत्वमेवेति अथ विधिर्निरूप्य
ते प्रयत्नजनकचिकीर्षाजनकज्ञानविषयो विधिः तत्र तिपादेः लिङादेः कृतिसाध्ये प्रवृत्तिदर्शनात्
कृत्यसाध्ये प्रवृत्त्यदर्शनात् कृतिसाध्यताज्ञानं प्रवर्तकं न च विषभक्षणादौ प्रवृत्तिप्रसंगः इष्टसाधन
तालिङ्गकं कृतिसाध्यताज्ञानस्य काम्यस्थले विहितकालजीवित्वनिमित्तज्ञानस्य नित्यनैमित्तिकस्थ २९
ले प्रवर्तकत्वात् नवानन्नगमः स्वविशेष ॥ ॥ ॥

दार्थान्तरकल्पनागौ
रवमिथ्याकारणाभा
दिवद्दाहानुपपत्ति
ङ्गीकार्येतिभावः

28

एवं तत्राभावाभावांगीकारे कैवल्यस्यानिर्विकल्पकत्वात् अभावाभावो भाव एव नातिरिक्तः अनवस्था
प्रसंगात् ध्वंस प्रागभावः प्रागभावध्वंसस्य प्रतियोग्येव अभावाभावोऽतिरिक्त एव तृतीयाभावस्य प्रथ
माभावरूपत्वात् नानवस्थेति नवीनाः ॥ ननु प्रमाणप्रमेयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णय
वादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगम इति न्यायशास्त्रे षोड
शपदार्थानामुक्तत्वात् कथं सप्तैवेत्यत आह सर्वेषामिति सर्वेषां सप्तस्वेवान्तर्भाव इत्यर्थः
आत्मा शरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयमिति द्वादशविधं प्र

सर्वेषां पदार्थानां यथायथमुक्तेष्वन्तर्भावात् सप्तैव पदार्था इति सिद्धम् ० ॥ ॥

मेयं प्रवृत्तिः धर्माधर्मौ रागद्वेषमोहा दोषाः रागः इच्छा द्वेषो मन्युः मोहः शरीरादावात्मभ्रमः प्रेत्यभावो मरणं फ
लं भोगः अपवर्गो मोक्षः स च स्वसमानाधिकरणदुःखप्रागभावासमानकालीनदुःखध्वंसः प्रयोज
नं सुखप्राप्तिः दुःखहानिश्च दृष्टान्तो महानसादिः प्रामाणिकत्वेनाभ्युपगतोऽर्थः सिद्धान्तः निर्णयो निश्च
यः प्रमाणफलं तत्त्वबुभुत्सोः कथा वादः उभयसाधनवती विजिगीषुकथा जल्पः स्वपक्षस्थापनही
ना वितण्डा कथा नाम नानावक्तृकपूर्वोत्तरपक्षप्रतिपादकवाक्यसंदर्भः अभिप्रायान्तरेण प्रयुक्तस्यार्था
न्तरप्रकल्पनया दूषणं छलं असदुत्तरं जातिः साधर्म्यवैधर्म्योत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यप्राप्त्यप्रा

जातिभेदानाह=१ प्रत्यनवर्कवेलोपसिन्धुक्तेःस्पष्टावनन्तइति२

तत्र धातोः कर्मत्वं धातुयोगमन्तरापि प्रकृष्टः इत्युक्ते प्रकर्षः इति वा आपत्तिरिति भावः नचविनिगमनाविरहः धातोरेव द्योतकत्वं किं न स्यादिति वाच्यम् धातोरुपसर्गं विनापि अर्थबोधकत्वनियमात् धातुविरहे ... त्वस्य वादिनामभ
पुनरपि वैयाकरणमतं दूषयतीत्यादिना २
मोक्ष त्वात् नच तेषां वाचकत्वमन्यत्रापि दृष्टमिति वाच्यम् तेषां धातोरिति तत्रापि योगसमवेतदन्यत्राह

त० दी० ३९ स्यादेवं धातोरेव प्रकर्षप्राप्तिः उपसर्गाणां द्योतकत्वमेव न तु वाचकत्वं शक्तिरस्ति पदार्थज्ञानस्य परंपरया प्रयोजनं मोक्षः श्रुत्या० १
तथाहि आत्मा वा रे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य इति श्रुत्या श्रवणादीनां साक्षात्कारहेतुत्व
बोधनात् श्रुत्या देहादिविलक्षणात्मज्ञाने सत्यपि असंभावनानिवृत्तेः युक्त्यनुसंधानरूपमननसाध्य
त्वात् मननोपयोगिपदार्थनिरूपणद्वारा शास्त्रस्यापि तदुपयोगः तदनन्तरं श्रुत्योपदिष्टयोगविधिना

क्त्र १

कणादन्यायमतयोर्बालव्युत्पत्तिसिद्धये अन्नंभट्टेन विदु
षा रचितस्तर्कसंग्रहः १ ॥ ॥ ॥

19

निवृत्ति
निदिध्यासने कृते तदनन्तरं देहादिविलक्षणात्मसाक्षात्कारे सति देहादावहमभिमानरूपमिथ्याज्ञान
नाशे सति दोषाभावात् प्रवृत्त्यभावे धर्माधर्मयोरभावात् जन्माभावे पूर्वधर्माधर्मयोरनुभवेन नाशे च
रमदुःखध्वंसलक्षणो मोक्षो जायते ज्ञानमेव मोक्षसाधनं मिथ्याज्ञाननिवृत्तेः ज्ञानमात्रसाध्य ३९
त्वात् तमेव विदित्वातिमृत्युमेति ॥

साधनता १ ननु कृतस्य यागध्वंसस्य व्यापारत्वासंभवात् पूर्वमेवोत्पत्ति [illegible] कीर्तनादिनेति ध्वंसस्या

ननु कथं तर्हि रथो गच्छति आख्यातस्य यत्नार्थकत्वे रथः गच्छति =१३

णावत्ताप्रतिसंधानमनन्यत्वस्य अन्वयगतत्वादिति गुरुमतत्वलाघवेन कृतिसाध्येष्टज्ञानस्यैव चिकीर्षाद्वारा प्रव
र्त्तकत्वात् न च नित्येष्टसाधनत्वाभावादप्रवृत्तिप्रसंगः तत्रापि प्रत्यवायपरिहारस्यापायत्वस्य च फल
त्वकल्पनात् तस्मात्कृतिसाध्येष्टसाधनत्वमेव लिङर्थः ननु ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यत्र लि
ङा स्वर्गसाधने कार्ये प्रतीयते यागस्याशुतरविनाशिनः कालान्तरभाविस्वर्गसाधनत्वायोग्यत्वात्
यागस्यापि कार्यमपूर्वमेव लिङर्थः कार्यं कृतिसाध्यं कृतेः सविषयत्वात् सविषयाकाङ्क्षायां यागो वि
षयत्वेनान्वेति कस्य कार्यमिति नियोज्याकाङ्क्षायां स्वर्गकामपदं नियोज्यपरतयान्वेति कार्यबोध्यो नि
योज्यः तेन ज्योतिष्टोमनामकयागविषयं स्वर्गकामस्य कार्यमिति वाक्यार्थः संप्रयते वैदिकलिङा
त् यावज्जीवमग्निहोत्रं जुहुयात् इति नित्यवाक्येऽपि अपूर्वमेव वाच्यं कल्प्यते आरोग्यकामो भेषज
पानं कुर्यादिति लौकिकलिङः क्रियाकार्यलक्षणे [illegible] च यागस्यापि [illegible] याभावेन साध
नतया प्रतीत्यनंतरं तन्निर्वाहार्थं अवान्तरव्यापारतया पूर्वकल्पनात् कीर्तनादिजन्यनाशप्रसङ्गे तेन नि
यागध्वंसो व्यापारः लोकव्युत्पत्तिबलात् क्रियायामेव कृतिसाध्येष्टसाधनत्वं लिङा बोध्यत इति लिङ्त्वे
न रूपेण गविधर्षित्वे आख्यातत्वेन प्रयत्नार्थकत्वं च तिपा करोतीति विवरणदर्शनात् किं करोतीति
प्रश्ने पचतीत्युत्तरात् आख्यातस्य प्रयत्नार्थकत्वं निष्प्रयासं रथो गच्छतीत्यादौ अनुकूलव्यापारे देवदत्तः पचतीति देवदत्ते तत्प्रय

नन्तेत्वेना विनाशि दितिभावः =४

कस्य पुरुष [illegible]

स्यादि

ननु द्वि

अपसंहरति नाख्यातेति =५

सर्ववैयाकरणाः आख्यातस्य कर्तर्येव शक्तिः सूत्रानुसारात् तथा च पार मर्थसूत्रं लः कर्मणि च भावे चाकर्मकेभ्यः इति तथा अभावे लक्षणाशक्तित्वात् न च कृतौ शक्तिः कर्तुर्लुप्तत्वेन ततीयापत्तिरित्याह

ननु क्रियाकार्यं प्रति समगतिवाचि तत्र

[illegible] कर्तृत्वेन कार्यत्वाभावं लादनेन शक्तिकल्पनेति रवात् रथो गच्छतीत्यादौ [illegible] देवदत्ते शक्तिकल्पनेऽपि व्यभिचारात् तेतंडुलमित्यादौ कर्तृकर्मणो [illegible] अर्थत्वं कित्त इति कर्त्वादि

कृतौ शक्तिकल्पने कृतेर्कर्तरि लाघवात् न च लक्षणा [illegible] चानिरूपितलक्षणापत्तेर्वा [illegible] प्रसंगः प्रयत्नो लाभः प्रयतो

[illegible] कर्त्तरि तृतीयाप्रसंगः कृतिः कर्त्तरि [illegible] तत्संभवात् आदेशपदे [illegible]

[illegible]

याक्रियाकार्यं कृति साधनत्वे

[illegible] ५२ ननु १

पिट्

त.टी. सःपंथाविद्यतेऽयनायेतिसाधनांतरनिषेधाच्च ननुतत्त्वाभिहेतुविज्ञानेकर्मचोक्तंमहाभारतेइतिकर्म
२ णोमोक्षसाधनत्वस्मरणात् ज्ञानकर्मणोःसमुच्चयइतिचेन्ननित्यनैमित्तिकैरेवकुर्वाणोदुरितक्षयं
ज्ञानंचविमलीकुर्वन्नभ्यासेनतुपाचयेत् अभ्यासात्पक्वविज्ञानःकैवल्यंलभतेनरः इत्यादिनाकर्मणोज्ञा

२०

इतितर्कसंग्रहःसमाप्तः ॥

नसाधनत्वप्रतिपादनात् ज्ञानद्वारैवकर्ममोक्षसाधनंनसाक्षात्तस्मात्पदार्थज्ञानस्यमोक्षःपरमप्रयो राम
जनमित्येवरमणीयमिति इतिश्रीमदन्नंभट्टोपाध्यायविरचिततर्कसंग्रहटीकासमाप्ता संवत् १८ २

[illegible]

लक्षितस्य लक्षणं संभवति नवेति विचारः परीक्षा ॥

लक्षणे चैपिवन्नस्य प्रयोगस्य कथं च नः बहुणि च्छा [illegible] [illegible] पते ?

असाधारणधर्मो लक्षणं ॥ यथा गंधवत्त्वं पृथिव्याः ॥

लक्षितं वस्तु [illegible] समानजातीय [illegible] असाधारण [illegible] ॥

इति [illegible] ॥

भाववित्वं अभावत्वम् ॥

शब्दस्य प्रकृतिनिमित्तं भावः ॥

[illegible]